# Shri Ganesha Stuti Prakritikrita

# પ્રકૃતિકૃતા શ્રીગણેશસ્તુતિઃ

## Document Information

Text title : Shri Ganesha Stuti Prakritikrita

File name : gaNeshastutiHprakRRitikRRitA.itx

Category : ganesha, mudgalapurANa, stuti

Location : doc_ganesha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM chaturthaH khaNDaH | adhyAyaH 1 | 4.1. 39-54||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 5, 2024

*sanskritdocuments.org*

# પ્રકૃતિકૃતા શ્રીગણેશસ્તુતિઃ

॥ શ્રીગણેશાય નમઃ ॥

પ્રકૃતિરુવાચ ।

નમસ્તે વિઘ્નનાથાય ગણેશાય પરાત્મને ।
અનાથાય વિશેષેણ સર્વનાથાય તે નમઃ ॥ ૩૯॥
નમો મૂષકવાહાય મૂષકધ્વજિને નમઃ ।
સ્વાનન્દપતયે તુભ્યં ગણાનાં પતયે નમઃ ॥ ૪૦॥
સિદ્ધિબુદ્ધિપ્રદાત્રે ચ સિદ્ધિબુદ્ધિવિહારિણે ।
યોગેશાય સદા શાન્તિપ્રદાત્રે યોગિને નમઃ ॥ ૪૧॥
સર્વાદયે સદા સર્વપૂજ્યાય ભક્તપાલકા ।
જ્યેષ્ઠરાજાય જ્યેષ્ઠાનાં પતયે તે નમો નમઃ ॥ ૪૨॥
બ્રહ્મણે બ્રહ્મદાત્રે વૈ બ્રહ્મણાં પતયે નમઃ ।
સિદ્ધેશ્વરાય દેવાનાં દૈત્યાનાં પતયે નમઃ ॥ ૪૩॥
ચતુર્ભુજાય હેરમ્બ પરશોર્ધારકાય તે ।
અઙ્કુશન્ધારિણે તુભ્યં નિરઙ્કુશ નમો નમઃ ॥ ૪૪॥
રજસા સૃષ્ટિકર્ત્રે તે પાલને સાત્ત્વિકાય તે ।
તામસાય મહાહન્ત્રે ગુણેશાય નમો નમઃ ॥ ૪૫॥
સ્થાવરાય ચરાયૈવ ચરાચરમયાય તે ।
ચરાચરવિહીનાય બોધાય ચ નમો નમઃ ॥ ૪૬॥
ચતુર્વિધસ્વરૂપાય ચતુર્વિધસુખપ્રદ ।
ચતુઃસુખસ્વરૂપાય સ્વસંવેદ્યાય તે નમઃ ॥ ૪૭॥
વિનાયકાય સર્વેષાં નાયકાય નમો નમઃ ।
ગજાનનાય દેવાય દેવદેવેશ તે નમઃ ॥ ૪૮॥
કિં સ્તૌમિ ત્વાં ગણાધ્યક્ષ બ્રહ્મણસ્પતિરૂપિણમ્ ।
યં સ્તોતું ન સમર્થાશ્ચ યોગિનો વેદમુખ્યકાઃ ॥ ૪૯॥
તવદર્શનબોધેન તથાપિ સંસ્તુતો મયા ।

તેન તુષ્ટો ભવ સ્વામિન્ ભક્તિં દેહિ દૃઢાં ત્વયિ ॥ ૫૦॥
ઇતિ સ્તુત્વા શ્રીગણેશાનં દણ્ડવત્ પ્રણનામ તમ્ ।
તામુત્થાપ્ય ગણાધીશ ઉવાચ વ્રતમાતરમ્ ॥ ૫૧॥
(ફલશ્રુતિઃ)
ગણેશ ઉવાચ ।
વરં વૃણુ મહાભાગે યં યમિચ્છસિ શોભને ।
તં તં દાસ્યામિ સુપ્રીતો ભક્ત્યા સ્તોત્રેણ તોષિતઃ ॥ ૫૨॥
ત્વયા કૃતમિદં સ્તોત્રં સર્વસિદ્ધિપ્રદં ભવેત્ ।
યઃ પઠેચ્છૃણુયાદ્દેવિ ઈપ્સિતં લભતે નરઃ ॥ ૫૩॥
એકકાલં દ્વિકાલં વા ત્રિકાલં લભતે સદા ।
અવ્રતી વ્રતસાફલ્યં પઠનાન્નાત્ર સંશયઃ ॥ ૫૪॥

ઇતિ પ્રકૃતિકૃતા શ્રીગણેશસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ મુદ્ગલપુરાણં ચતુર્થઃ ખણ્ડઃ । અધ્યાયઃ ૧ । ૪.૧। ૩૯-૫૪॥

- .. mudgalapurANaM chaturthaH khaNDaH . adhyAyaH 1 . 4.1. 39-54..

Proofread by Yash Khasbage, Preeti Bhandare

*Shri Ganesha Stuti Prakritikrita*
pdf was typeset on June 5, 2024

Please send corrections to *sanskrit@cheerful.com*